# Shukracharyakritam Shiva Stotram

# શુક્રાચાર્યકૃતં શિવસ્તોત્રમ્

## Document Information

Text title : Shukracharyakritam Shiva Stotram

File name : shukrAchAryakRRitaMshivastotram.itx

Category : shiva, brahmANDapurANa, stotra

Location : doc_shiva

Proofread by : PSA Easwaran

Description/comments : brahmANDapurANa | madhyabhAga | upoddhAta | adhyAya 72/163-195||

Latest update : October 1, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

October 1, 2024

*sanskritdocuments.org*

# શુક્રાચાર્યકૃતં શિવસ્તોત્રમ્

તદા તિર્યક્સ્થિતસ્ત્વેવં તુષ્ટુવે નીલલોહિતમ્ ।
શુક્ર ઉવાચ ।
નમોઽસ્તુ શિતિકણ્ઠાય સુરાદ્યાય સુવર્ચસે ॥ ૨, ૭૨.૧૬૩॥

લેલિહાનાય લેહ્યાય વત્સરાય જગત્પતે ।
કપર્દિને હ્યૂર્દ્ધ્વરોમ્ણે હર્યક્ષવરદાય ચ ॥ ૨, ૭૨.૧૬૪॥

સંસ્તુતાય સુતીર્થાય દેવદેવાય રંહસે ।
ઉષ્ણીષિણે સુવક્ત્રાય સહસ્રાક્ષાય મીઢુષે ॥ ૨, ૭૨.૧૬૫॥

વસુરેતાય રુદ્રાય તપસે ચીરવાસસે ।
નિઃસ્વાય મુક્તકેશાય સેનાન્યે રોહિતાય ચ ॥ ૨, ૭૨.૧૬૬॥

કવયે રાજવૃદ્ધાય તક્ષકક્રીડનાય ચ ।
ગિરિશાયાર્કનેત્રાય યતયે ચાજ્યપાય ચ ॥ ૨, ૭૨.૧૬૭॥

સુવૃત્તાય સુહસ્તાય ધન્વિને ભાર્ગવાય ચ ।
સહસ્રબાહવે ચૈવ સહસ્રામલચક્ષુષે ॥ ૨, ૭૨.૧૬૮॥

સહસ્રકુક્ષયે ચૈવ સહસ્રચરણાય ચ ।
સહસ્રશિરસે ચૈવ બહુરૂપાય વેધસે ॥ ૨, ૭૨.૧૬૯॥

ભવાય વિશ્વરૂપાય શ્વેતાય પુરુષાય ચ ।
નિષઙ્ગિણે કવચિને સૂક્ષ્માય ક્ષપણાય ચ ॥ ૨, ૭૨.૧૭૦॥

તામ્રાય ચૈવ ભીમાય ઉગ્રાય ચ શિવાય ચ ।
મહાદેવાય સર્વાય વિશ્વરૂપશિવાય ચ ॥ ૨, ૭૨.૧૭૧॥

હિરણ્યાય વસિષ્ઠાય વર્ષાય મધ્યમાય ચ ।
ધામ્ને ચૈવ પિશઙ્ગાય પિઙ્ગલાયારુણાય ચ ॥ ૨, ૭૨.૧૭૨॥

પિનાકિને ચેષુમતે ચિત્રાય રોહિતાય ચ ।

દુન્દુભ્યાયૈકપાદાય અર્હાય બુદ્ધયે તથા ।
મૃગવ્યાધાય સર્વાય સ્થાણવે ભીષણાય ચ ॥ ૨, ૭૨.૧૭૩॥

બહુરૂપાય ચોગ્રાય ત્રિનેત્રાયેશ્વરાય ચ ।
કપિલાયૈકવીરાય મૃત્યવે ત્ર્યમ્બકાય ચ ॥ ૨, ૭૨.૧૭૪॥

વાસ્તોષ્પતે પિનાકાય શઙ્કરાય શિવાય ચ ।
આરણ્યાય ગૃહસ્થાય યતિને બ્રહ્મચારિણે ॥ ૨, ૭૨.૧૭૫॥

સાઙ્ખ્યાય ચૈવ યોગાય ધ્યાનિને દીક્ષિતાય ચ ।
અન્તર્હિતાય સર્વાય તપ્યાય વ્યાપિને તથા ॥ ૨, ૭૨.૧૭૬॥

બુદ્ધાય ચૈવ શુદ્ધાય મુક્તાય કેવલાય ચ ।
રોધસે ચૈકિતાનાય બ્રહ્મિષ્ઠાય મહર્ષયે ॥ ૨, ૭૨.૧૭૭॥

ચતુષ્પાદાય મેધ્યાય વર્મિણે શીઘ્રગાય ચ ।
શિખણ્ડિને કપાલાય દણ્ડિને વિશ્વમેધસે ॥ ૨, ૭૨.૧૭૮॥

અપ્રતીતાય દીપ્તાય ભાસ્કરાય સુમેધસે ।
ક્રૂરાય વિકૃતાયૈવ બીભત્સાય શિવાય ચ ॥ ૨, ૭૨.૧૭૯॥

શુચયે પરિધાનાય સદ્યોજાતાય મૃત્યવે ।
પિશિતાશાય શર્વાય મેઘાય વૈદ્યુતાય ચ ॥ ૨, ૭૨.૧૮૦॥

દક્ષાય ચ જઘન્યાય લોકાનામીશ્વરાય ચ ।
અનામયાય ચેધ્માય હિરણ્યાયૈકચક્ષુષે ॥ ૨, ૭૨.૧૮૧॥

શ્રેષ્ઠાય વામદેવાય ઈશાનાય ચ ધીમતે ।
મહાકલ્પાય દીપ્તાય રોદનાય હસાય ચ ॥ ૨, ૭૨.૧૮૨॥

દૃઢધન્વિને કવચિને રથિને ચ વરૂથિને ।
ભૃગુનાથાય શુક્રાય ગહ્વરિષ્ઠાય ધીમતે ॥ ૨, ૭૨.૧૮૩॥

અમોઘાય પ્રશાન્તાય સદા વિપ્રપ્રિયાય ચ ।
દિગ્વાસઃ કૃત્તિવાસાય ભગઘ્નાય નમોઽસ્તુ તે ॥ ૨, ૭૨.૧૮૪॥

પશૂનાં પતયે ચૈવ ભૂતાનાં પતયે નમઃ ।
પ્રભવે ઋગ્યજુઃસામ્ને સ્વાહાયૈ ચ સુધાય ચ ॥ ૨, ૭૨.૧૮૫॥

વષટ્કારતમાયૈવ તુભ્યં મન્ત્રાત્મને નમઃ ।
સ્રષ્ટ્રે ધાત્રે તથા કર્ત્રે હર્ત્રે ચ ક્ષપણાય ચ ॥ ૨, ૭૨.૧૮૬॥

ભૂતભવ્યભવેશાય તુભ્યં કર્માત્મને નમઃ ।
વસવે ચૈવ સાધ્યાય રુદ્રાદિત્યાશ્વિનાય ચ ॥ ૨, ૭૨.૧૮૭॥

વિશ્વાય મરુતે ચૈવ તુભ્યં દેવાત્મને નમઃ ।
અગ્નીષોમવિધિજ્ઞાય પશુમન્ત્રૌષધાય ચ ॥ ૨, ૭૨.૧૮૮॥

દક્ષિણાવભૃથાયૈવ તુભ્યં યજ્ઞાત્મને નમઃ ।
તપસે ચૈવ સત્યાય ત્યાગાય ચ શમાય ચ ॥ ૨, ૭૨.૧૮૯॥

અહિંસાયાથ લોભાય સુવેષાયાનિશાય ચ ।
સર્વભૂતાત્પ્રભૂતાય તુભ્યં યોગાત્મને નમઃ ॥ ૨, ૭૨.૧૯૦॥

પૃથિવ્યૈ ચાન્તરિક્ષાય મહસે ત્રિદિવાય ચ ।
જનસ્તપાય સત્યાય તુભ્યં લોકાત્મને નમઃ ॥ ૨, ૭૨.૧૯૧॥

અવ્યક્તાયાથ મહતે ભૂતાયૈવેન્દ્રિયાય ચ ।
તન્માત્રાયાથ મહતે તુભ્યં તત્ત્વાત્મને નમઃ ॥ ૨, ૭૨.૧૯૨॥

નિત્યાય ચાપ્યલિઙ્ગાય સૂક્ષ્માય ચેતરાય ચ ।
શુદ્ધાય વિભવે ચૈવ તુભ્યં નિત્યાત્મને નમઃ ॥ ૨, ૭૨.૧૯૩॥

નમસ્તે ત્રિષુ લોકેષુ સ્વરન્તેષુ ભુવાદિષુ ।
સત્યાન્તમહરાદ્યેષુ ચતુર્ષુ ચ નમોઽસ્તુ તે ॥ ૨, ૭૨.૧૯૪॥

નામસ્તોત્રે મયા હ્યસ્મિન્યદસદ્વ્યાહૃતં પ્રભો ।
મદ્ભક્ત ઇતિ બ્રહ્મણ્ય સર્વં તત્ક્ષન્તુમર્હસિ ॥ ૨, ૭૨.૧૯૫॥

ઇતિ શ્રીબ્રહ્માણ્ડપુરાણે મધ્યમભાગે દ્વિસપ્તતિતમાધ્યાયાન્તર્ગતં
શુક્રાચાર્યકૃતં શિવસ્તોત્રં સમાપ્તમ્ ।

બ્રહ્માણ્ડપુરાણ । મધ્યભાગ । ઉપોદ્ધાત । અધ્યાય ૭૨/૧૬૩-૧૯૫॥

brahmANDapurANa . madhyabhAga . upoddhAta . adhyAya 72/163-195..

Proofread by PSA Easwaran

*Shukracharyakritam Shiva Stotram*

pdf was typeset on October 1, 2024

Please send corrections to *sanskrit@cheerful.com*